A

**SAMAGRA SHIKSHA, KERALA**

**SUMMATIVE ASSESSMENT - TERM I - 2025-26**

**1011**

First Language Part I- Paper-I

# SANSKRIT

(For Academic and Oriental Sanskrit Schools)

**Class- X**

Time 1 ½ Hours **Total Score - 40**

---

निर्देशाः -

- 15 निमेषाः समाश्वासकालः ।
- प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

---

## भागः - 1

**1. अधोदत्तेभ्यः गणेभ्यः विपरीतार्थकं गणं चित्वा लिखत ।** (1)

क) काननम् - वनम् । ख) निम्नः - उन्नतः ।

ग) शाखामृगः - वानरः । घ) दरी - गुहा ।

**2. अधोदत्तपट्टिकां पठित्वा उचितरूपेण युक्तं गणं चित्वा लिखत ।** (1)

| | |
|---|---|
| कृत्वा | तुमुन्नन्तम् । |
| स्वीकृत्य | क्त्वान्तम् । |
| व्यवहर्तुम् | ल्यबन्तम् । |

क) कृत्वा – तुमुन्नन्तम्, स्वीकृत्य – क्त्वान्तम्, व्यवहर्तुम् – ल्यबन्तम् ।

ख) कृत्वा – ल्यबन्तम्, स्वीकृत्य – तुमुन्नन्तम्, व्यवहर्तुम्– क्त्वान्तम् ।

ग) कृत्वा – क्त्वान्तम्, स्वीकृत्य – ल्यबन्तम्, व्यवहर्तुम् - तुमुन्नन्तम् ।

घ) कृत्वा – क्त्वान्तम्, स्वीकृत्य – तुमुन्नन्तम्, व्यवहर्तुम् – ल्यबन्तम् ।

**3. प्रस्तावनाद्वयं पठत । अधस्तात् साधु उत्तरं किमिति लिखत ।** (1)

(१) गायकं परितः आस्वादकाः तिष्ठन्ति ।

(२) अध्यापकस्य परितः छात्राः उपविशन्ति ।

क) प्रथमं वाक्यं साधु ।

ख) द्वितीयं वाक्यं साधु ।

ग) प्रथमं वाक्यम् असाधु ।

घ) प्रथमं द्वितीयं च वाक्यम् असाधु ।

4. विद्यालयस्य जैववैविध्यारमे अनेकानि जीवजालानि सन्ति। छात्राः तेषां परिपालनं सम्यक् कुर्वन्ति। अत्र कः मनोभावः प्रतिफलति? (1)

क) अत्याग्रहः। ख) सहजीविस्नेहः

ग) स्वार्थता। घ) असहिष्णुता।

**भागः - 2**

5. "भूमिः समस्तजीवजालानाम् ऐश्वर्यप्रदायिनी भवति।" इति आशयुक्तं पद्यं चित्वा लिखत। (2)

क) प्रकृतिस्तु मोहनाकारेण भीषणे-
नानन्त्यरूपेण वर्ततेऽत्र।
वनराजिसम्पदः प्राणिनामिव मर्त्य-
लोकस्य सर्वथा हितकराः स्युः॥

ख) सर्वेषां जीवजालानां
सर्वसौभाग्यदायिनी।
सर्वंसहेयं जननी
क्षितिरार्द्रा भवेत्सदा॥

6. अधोदत्तं वाक्यं पठित्वा शत्रन्तं- शानजन्तं च चित्वा लिखत। (2)

सः गीतं शृण्वन् पचमानः अस्ति।

शत्रन्तम् - ........................

शानजन्तम् - ........................

7. उदाहरणानुसारं समानसन्धियुक्तं पदं स्वण्डिकातः स्वीकृत्य पदच्छेदं कुरुत। (2)

विद्यालयेऽस्मिन् प्रकृतिसंरक्षणदिनं समुचितमाचरति। एतदाकर्ण्य सर्वे छात्राः सस्यानि आनीतवन्तः।

उदा - ग्रन्थेऽस्मिन् - ग्रन्थे + अस्मिन्।

क) ..................... - ..................+ ................ ।

उदा - तदारभ्य - तत् + अरभ्य।

ख) ...................... - .................+ ................ ।

8. (I) अधोरेखाङ्कितपदमुत्तरत्वेन लब्धुं योग्यं प्रश्नं रचयत। (2)

[ प्रश्नवाचकपदानि - कः, कम्, केन, कस्य ]

क) होर्तूस् मलबारिक्कूस् नामके ग्रन्थे प्रथमं <u>नालिकेरवृक्षस्य</u> विवरणम् अकरोत्।

ख) बलभद्रः <u>हलेन</u> कालिन्दीं व्यदारयत्।

**अथवा**

(II) अधोदत्ते पदे उपयुज्य नूतनं वाक्यं रचयत।

क) नास्ति। ...................................................................... ।

ख) जलाभावेन ...................................................................... ।

9. ऋते उपयुज्य वाक्यं परिवर्तयत । (2)

उदा - उद्याने कमलस्य ऋते सर्वाणि पुष्पाणि सन्ति ।

उद्याने कमलात् ऋते सर्वाणि पुष्पाणि सन्ति ।

(क) ग्रन्थालये अमरकोशस्य ऋते कोशग्रन्थाः सन्ति ।

........................................................................ ।

10. उचितं विग्रहवाक्यं चित्वा लिखत । (3)

क) पतिंवरा - ..........................

ख) घनगर्जनम् - ..........................

ग) हलायुधः - ..........................

| |
|---|
| घनं च तत् गर्जनं च । |
| घनं च घोरं च सुन्दरं च । |
| हलम् आयुधः यस्य सः । |
| पतिं वृणीते या सा । |

11. गद्यभागे लट्लकारस्य स्थाने लङ्लकाररूपम् उपयुज्य परिवर्त्य लिखत । (3)

इन्दुमती स्वयंवरमण्डपं गच्छति । सा तत्र अनेकान् राजकुमारान् पश्यति । तान् दृष्ट्वा सा सखीम् एवं वदति ।

12. श्लोकं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत । (4)

घनघोरसुन्दरं बन्धुरं काननं
खगमृगादीनां तु सुखनिशान्तम् ।
नवपल्लवाढ्यं च कुसुमसम्पन्नकं
परितो महीधरं भोः! चकास्ति ॥

क) श्लोकात् 'गृहम्' इत्यर्थकं पदं चित्वा लिखत ।

ख) अत्र क्रियापदं किम् ?

ग) श्लोकस्य आशयं स्ववाक्यैः लिखत ।

13. प्रादेशिकभाषया अशयानुसारं विवर्तयत । (4)

वैलोप्पिल्ली श्रीधरमेनोन् आधुनिककेरलीयकविषु प्रसिद्धो भवति । मर्त्यजीवनस्य बहुविधाः भावाः तस्य कवितासु द्रष्टुं शक्यन्ते । तस्य माम्पषम् नाम कविता अतिप्रसिद्धा भवति । मातृपुत्रस्नेहस्य उत्तमम् उदाहरणं भवति इयं कविता ।

14. (I) पट्टिकातः पदानि स्वीकृत्य चत्वारि अर्थपूर्णवाक्यानि लिखत । (4)


| | | | |
|---|---|---|---|
| बलभद्रः | व्यायामं | संस्कृतम् | अवदत् । |
| अहं | चलच्चित्रम् | कर्तुं | धावन्ति । |
| त्वं | सम्यक् | द्रष्टुं | गच्छामि । |
| हरिणाः | सिंहं | दृष्ट्वा | पठ । |
| सोमा | कालिन्दीं | सादरं | गच्छति । |

**उदा - बलभद्रः कालिन्दीं सादरं अवदत् ।**


**अथवा**

**(II) विशेषणविशेष्यानि उपयुज्य वाक्यं विपुलीकुरुत ।**

उदा- [सहृदयाः साहित्यादीनां लावण्यम् इच्छन्ति अनुभोक्तुम् ]




क) [ बालकाः हास्यरसप्रधानं चलचित्रं इच्छन्ति द्रष्टुम् ]



15. (I) सस्यानाम् औषधगुणान् अधिकृत्य लघुटिप्पणीं लिखत । (4)

**श्रद्धेयाः अंशाः** - औषधसस्यानि - तुलसी - यवनप्रियम् - सर्वविषहारिणी - ऊर्जप्रदायिनि- आयुर्वेदग्रन्थाः - होर्त्तूस् मलबारिक्कूस् ।

**अथवा**

**(II) वनसंरक्षणमिति विषये लघुविवरणं लिखत ।**

**श्रद्धेयाः अंशाः** - प्रकृतिः - सस्यसम्पन्नं काननं - प्राणवायुः - शुद्धजलम् - वनवत्करणम् - वनसंरक्षणम् ।

16. (I) संभाषणांशान् पूरयत । (4)

हेन्ड्रिक् वान् रीड् - केरलेषु विद्यमानेषु सस्येषु कानि कानि औषधगुणयुक्तानि भवन्ति ?

इट्टि अच्युतन् - .............................................. ।

हेन्ड्रिक् वान् रीड् - सर्वमपि ? ! ....................आश्चर्यमेतत् ।

इट्टि अच्युतन् - आम् । अनौषधं सस्यं नास्त्येव ।

हेन्ड्रिक् वान् रीड् - एवं चेत् ........................................................ ?

इट्टि अच्युतन् - तुलसी सर्वविषहारिणी भवति ।

हेन्ड्रिक् वान् रीड् - सर्वेषां सस्यानां पट्टिकां कर्तुं शक्यते वा ?

इट्टि अच्युतन् - आम् शक्यते ।............................................... ।

हेन्ड्रिक् वान् रीड् - भवतः साहाय्यम् आवश्यकमेव ।

**अथवा**

**(II) पर्यावरणदिने केचन छात्राः एकं वैद्यं समीप्य औषधसस्यानां विषये सम्भाषणं कुर्वन्ति । तदर्थं प्रश्नचतुष्टयं सम्भाव्य लिखत ।**

** ** **